अत्र नेत्रादीनां उत्पलादिसादृश्यं वाच्यं, सरःश्रीणाङ्गनासादृश्यं गम्यम्। "कथिता रसनोपमा। यथोर्द्धमुपमेयस्य यदि स्यादुपमानता" ॥ "चन्द्रायते शुक्लरुचापि हंसो हंसायते चारुगतेन कान्ता। कान्तायते स्पर्शसुखेन वारि वारीयते स्वच्छतया विहायः" ॥ "मालोपमा यदेकस्योपमानं बहु दृश्यते"। यथा। "वारिजेनेव सरसी शशिनेव निशीथिनी। यौवनेनेव वनिता नयेन श्रीर्मनोहरा" ॥ क्वचिदुपमानोपमेययोर्द्वयोरपि प्रकृतत्वं दृश्यते ॥ 'हंसश्चन्द्र इवाभाति जलं व्योमतलं यथा। विमलाः कुमुदानीव तारकाः शरदागमे" ॥ "अस्य राज्ञो गृहे भान्ति भूपानीता विभूतयः। पुरन्दरस्य भवने कल्पवृक्षभवा इव" ॥ अत्रोपमेयभूतविभूतिभिः कल्पवृक्षवैभवा इवेति" उपमानभूता विभूतय आक्षिप्यन्त इति आक्षेपोपमा। अत्रैव "गृहे इत्यस्य" "भवने इत्यनेन प्रतिनिर्द्देशात् प्रतिनिर्द्देश्योपमा इत्यादयश्च न लक्षिताः एवंविधवैचित्र्यस्य सहस्रधा सन्दर्शनात्" सा०द०। "प्रसिद्धेरनुरोधेन यः परस्परमर्थयोः। भूयोऽवयवसामान्ययोगः सेहोपमा मता" स०कण्ठा०।

२१ उपमानम्। "सदृशात् सदृशज्ञानमुपमानं द्विधेह तत्। स्यादेकमनुभूतार्थेऽननुभूते द्वितीयकम्"। स०कण्ठा०तत्रानुभूतार्थे यथा "सर्व्वप्राणप्रवणमघवन्मुक्तमाहत्य वक्षस्तत्संङ्घाताद्विघटितदलत्खण्डमुक्षखण्डरोचिः। एवं वेगात् कुलिशकरोत् व्योम विद्युत्सहस्रं भर्त्तुर्वैजज्वलनकपिशास्ते च रोषाट्टहासाः" ॥ अननुभूते "तां रोहिणीं विजानीहि ज्योतिषामत्र मण्डले। समूहस्तारकाणां यः शकटाकारमाश्रितः" ॥

२२ उपमेयोपमा "पर्य्यायेण द्वयोरेतदुपमेयोपमा मता" दर्पणे। "कमलेव मतिर्मतिरिव कमला तनुरिव विभा विभेव तनुः"

२३ उल्लासः "एकस्य गुणदोषाभ्यामुल्लासोऽन्यस्य तौ यदि"। च०। तत्र गुणे "अपि मां पावयेत् साध्वी स्नात्वेतीच्छति जाह्नवी। दोषे, "काठिन्यं कुचयोर्दृष्ट्वा वाञ्छन्त्यः पादपद्मयोः। निन्दन्ति विश्वधातारं त्वद्वाटीष्वरियोषितः"।

२४ उल्लेखः "क्वचिद्भेदाद्ग्रहीतॄणां विषयाणां तथा क्वचित्। एकस्यानेकधोल्लेखः यः स उल्लेख इष्यते" सा०द० "प्रिय इति गोपवधूभिः शिशुरिति वृद्धैरधीश इति देवैः। नारायण इति भक्तैर्ब्रह्मेत्यग्राहि योगिभिर्देवः"। "गाम्भीर्य्येण समुद्रोऽसि गौरवेणासि पर्वतः"।

२५ ऊर्जस्वि "ऊर्जस्वि रूढ़ाहङ्कारम्" इति "अपकर्त्ताहमस्मीति हृदि ते मा स्म भूद्भयम्। विमुखेषु न मे खड्गः प्रहर्त्तुं जातु वाञ्छति एवमुक्त्वा परोयुद्धे निरुद्धोदर्पशालिना। पुंसा केनापि तज्ज्ञेयमूर्ज्जस्वीत्येवमादिकम्" इति च दण्डी।

२६ एकावली पूर्व्वं पूर्व्वं प्रति विशेषणत्वेन परं परम्। स्थाप्यतेऽपोह्यते वाचा स्याच्चथैकावली द्विधा"। सा०द० स्थापने। "सरोविकसिताम्भोजमम्भोजं भृङ्गसङ्गमम्। भृङ्गायत्र ससङ्गीताः सङ्गीतं सस्मरोदयम्"। वर्जने। "न तज्जलं यन्न सुचारुपङ्कजं न पङ्कजं तद्यदलीनषट्पदम्। न षट्पदोऽसौ न जुगुञ्ज यः कलं न गुञ्जितं तन्न जहार यन्मनः'।

२७ कारकदीपकम् "क्रमिकैकगतानान्तु गुम्फः कारकदीपकम्"। च० अत्र कारकः क्रिया कर्त्तृत्वादिसंज्ञाकारित्वात् "गच्छत्यागच्छति पुनः पान्थः पश्यति पृच्छति"।

२८ कारणमाला "परंपरं प्रति यदा पूर्व्वपूर्व्वस्य हेतुता। तदा कारणमाला स्यात्"। सा०द० "श्रुतं कृतधियां सङ्गाज्जायते, विनयः श्रुतात्। लोकानुरागो विनयान्न किं लोकानुरागतः" ॥

२९ काव्यलिङ्गम् "हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम्"। सा०द० "जितोऽसि मन्द! कन्दर्प! मच्चित्तेऽस्ति त्रिलोचनः" अत्र पदार्थस्य हेतुता। वाक्यार्थस्य यथा। "यत्त्वन्नेत्रसमानकान्तिसलिले मग्नं तदिन्दीवरं मेघैश्छन्नरितं प्रिये तवमुखच्छायानुकारी शशी। येऽपि त्वद्गमनानुकारिगतयस्ते राजहंसा गतास्त्वत्सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते"। अत्र चतुर्थपादार्थं आद्यपादत्रयार्थानां हेतुता ॥

४० काव्यार्थापत्तिः "कैमुत्येनार्थसंसिद्धिः काव्यार्थापत्तिरिष्यते"। च० "स जितस्त्वन्मुखेनेन्दुः का वार्त्ता सरसीरुहाम्"।

४१ कैतवापह्नुतिः "कैतवापह्नुतिर्व्यक्तौ व्याजाद्यैर्निह्नवे पदैः"। च० "निर्यान्ति स्मरनाराचा बालादृक्पातकैतवात्" इयम् व्याजापह्नुतिरित्यन्ये अपह्नुतिशब्दे विवृतिः।

४२ गूढोक्तिः "गूढोक्तिरन्योद्देश्या गीर्यदन्यं प्रति गद्यते"। च० "वृषापेहि परक्षेत्रादायाति क्षेत्ररक्षकः"। जारोद्देशेन वृषं प्रत्युक्तिः।

४३ चपलातिशयोक्तिः चपलातिशयोक्तिस्तत् पौर्वापर्य्यव्यतिक्रमः"। च० "अग्रे मानेगतः पश्चादनुनीता प्रियेण सा" ॥

४४ छेकापह्नुतिः "छेकापह्नुतिरन्यस्य शङ्कातस्तस्य निह्नवे"।